संस्कृतवार्ता:
18.09.2025

सायम्  - 06:20

<u>मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी अद्य नेपालस्य अन्तरिम-प्रधानमन्त्रिणा सुशीला-कार्की इत्यनया सह संवादं कृतवान्। सहैव शान्तिस्थैर्ययोः पुनः प्रतिष्ठायै भारतस्य दृढ-समर्थनमपि प्रतिपादितवान्।
- केन्द्रीय-वित्तमन्त्रिणा निर्मला-सीतारमण इत्यनया प्रोक्तं यत् राज्येषु स्थितानां औद्योगिक-प्रशिक्षणसंस्थानानां एआई-सञ्चालित-प्रशिक्षणकेन्द्रत्वेन उन्नयनार्थं केन्द्रपक्षतः पूर्ण-वित्तसमर्थनं प्रदास्यते।
- निर्वाचनायोगेन अद्य प्रोक्तम् कांग्रेस-नेतुः राहुल-गान्धिनः मत-विलोपनसंबद्धाः आरोपाः मिथ्या- निराधाराश्च सन्ति।
- भारतेन पाकिस्तानस्थितानि आतंकवादिसङ्गठनानि विरुध्य वैश्विककार्याचरणाय संयुक्तराष्ट्रस्य आह्वानं कृतम्।

<u>प्रधानमन्त्री-सुशीलाकार्की</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य नेपालस्य अन्तरिम-प्रधानमन्त्रिणा सुशीला-कार्की इत्यनया सह संवादं कृतवान्। सोशल-मीडियासन्देशे श्रीमोदिना प्रोक्तं यत् नेपाले जनहानिमालक्ष्य तेन गहन-संवेदना प्रकटिता सहैव शान्तिस्थैर्ययोः पुनः प्रतिष्ठायै भारतस्य दृढ-समर्थनमपि प्रतिपादितम्। अस्मिन्नेव प्रसङ्गे सः नेपालस्य राष्ट्रियदिवसमालक्ष्य तस्यै नेपालजनेभ्यश्च हृदयपूर्वकं शुभकामनाम् अयच्छत् ।

<u>आईआईटी-सीतारमण</u>

केन्द्रीय-वित्तमन्त्रिणा निर्मला-सीतारमण इत्यनया प्रोक्तं यत् राज्येषु स्थितानां औद्योगिक-प्रशिक्षणसंस्थानानां एआई-सञ्चालित-प्रशिक्षणकेन्द्रत्वेन उन्नयनार्थं केन्द्रपक्षतः पूर्ण-वित्तसमर्थनं प्रदास्यते। नवदिल्ल्यां भारतीय-गुणवत्ता-प्रबन्धन-फाउंडेशन इत्यस्य वार्षिक-संगोष्ठीं सम्बोधयन्ती सा प्रोक्तवती यत् उद्योगस्य परिवर्तमानानां आवश्यकतानां पूर्त्यर्थं आईटीआई-संस्थानानाम् उन्नयनं प्रचलति। मन्त्रिणा कथितं यत् विगतेषु द्वित्रिवर्षेषु वार्षिक-आयव्ययके सर्वकारेण जनशक्तेः कौशल-विकासाय विशेष-प्रावधानानि कृतानि । तया प्रोक्तं यत् सर्वकारः एतदपि सुनिश्चिनोति यत् युवानः प्रोत्साहनेन सह प्रशिक्षिताः अपि भवेयुः। मन्त्रिणा उद्योग-जगतः देशस्य युवकानां कौशल-विकासे सर्वकारेण सह भागग्रहणार्थं आग्रह: कृतः।

गान्धी-निर्वाचनायोगः

निर्वाचनायोगेन अद्य प्रोक्तम् यत् कांग्रेस-नेतुः राहुल-गान्धिनः मत-विलोपनसंबद्धाः आरोपाः मिथ्या- निराधाराश्च सन्ति। आयोगेन कथितं यत् कस्यापि मतस्य आनलाईन-माध्यमेन विलोपनं नैव कर्तुं शक्यते। आयोगेन स्मारितं यत् त्रयोविंशत्यधिक-द्विसहस्रतमे वर्षे कर्नाटकस्य अलंद-विधानसभाक्षेत्रे मतदातॄणां नाम-विलोपनाय कतिचन निष्फलप्रयासाः अजायन्त तदा आयोगेन स्वयमेव प्राथमिकी प्रदत्तासीत्। प्रतिवेदनानुसारं अलंद-विधानसभाक्षेत्रे अष्टादशाधिक-द्विसहस्रतमे वर्षे भाजपायाः सुभाध-गुट्टेदारः त्रयोविंशत्यधिक-द्विसहस्रतमे वर्षे कांग्रेसस्य बी.आर.पाटिलः इत्येतौ विजितवन्तौ। अतः पूर्वं राहुल-गान्धिना अभिहितं यत् अलंद-विधानसभाक्षेत्रे न्यूनातिन्यूनं षट्-सहस्रं मतानि विलोपितानि। नवदिल्लीस्थे दलमुख्यालये एकं संवाददातृ-सम्मेलनं सम्बोधयन् राहुल-गान्धी आक्षिप्तवान् यत् सॉफ्टवेयर-तन्त्रे हस्तक्षेपेण मतदातृ-सूचीतः नामानि अपसारितानि। अत्रान्तरे भाजपादलेन भूयो-भूयशः निर्वाचनायोगं विरुध्य मिथ्यारोप-प्रक्षेपणाय राहुल-गान्धी इत्येषः भर्त्सितः। नवदिल्लीस्थे दलमुख्यालये वार्ताहरसम्मेलने वरिष्ठभाजपा-नेत्रा अनुराग-ठाकुरेण आरोपितं यत् टूलकिट इत्यस्य साहाय्यमाश्रित्य राहुलगान्धी संवैधानिक-संस्थानानामुपरि प्रश्नान्युत्थाय तान् दुर्बलीकरोति।

अमितशाह-बिहार

भाजपेति दलस्य वरिष्ठनेता , केन्द्रीय-गृह-मन्त्री अमितशाहः प्रत्यपादयत् यत्, बिहारस्य एन्. डी. ए. सर्वकारः केन्द्रप्रशासनस्य पूर्णसमर्थनेन विकसितबिहारस्य निर्माणार्थं कार्यं कुर्वन् अस्ति इति। रहीतास्-मण्डले शाहाबाद्-मगध्-प्रदेशयोः बी.जे.पी-नेतॄणां कार्यकर्तॄणां च प्रादेशिकसभां सम्बोधयन्, श्री शाहः पक्षकार्यकर्तृभ्यः प्रतिगृहं गत्वा आङ्गनवाडी-कार्यकर्तॄणां, आङ्गनवाडी-सहायकानां, ममता- स्वसानां, जीविका-स्वसानां, यूनां, महिलानां च कल्याणार्थं नितीश्-सर्वकारेण कृताः उपायाः जनान् सूचयितुं आह्वयत्। श्री शाहः आरोपितवान् यत् काङ्ग्रेस्-नेतुः राहुल् गान्धिनः "मतदातृ -अधिकार-यात्रा" वस्तुतः भ्रष्टजनानां रक्षणार्थम् अभियानम् अस्ति इति।

बिहार-नीतीशः

बिहार-सर्वकारेण वृत्तिहीनेभ्यः पुरुषेभ्यः महिला-स्नातकेभ्यश्च वर्षद्वयं यावत् सहस्र-रूप्यात्मकस्य अनुदानस्य घोषणा कृता। मुख्यमन्त्री-निश्चय-स्वयं-सहायता-भत्ता- योजनया कला–विज्ञान–वाणिज्य-संकायानां वृत्तिहीनाः पुरुषाः स्नातक-महिलाश्च लाभान्विताः भविष्यन्ति। राज्ये विधानसभा-निर्वाचनात् प्राक् मुख्यमन्त्रिणा कृतासु घोषणासु अयं महत्त्वपूर्णः निर्णयः वर्तते। अस्यान्तर्गतं, विंशतितः पञ्चविंशति-वर्षदेशीयाः स्नातक-युवानः ये अध्ययनाय नामाङ्किताः न सन्ति, किन्तु सक्रियतया कार्यं अन्विषन्ते ते एतदर्थं योग्याः भविष्यन्ति।

अश्विनी-वैष्णव:

सूचना-प्रसारण-मन्त्रिणा अश्विनी-वैष्णवेन प्रोक्तं यत् आयकर-अधिनियमेषु वस्तु-सेवा-करे च प्रमुखाः परिष्काराः कृताः। नव-दिल्ल्यां पी-ए-एफ-आई- पञ्चविंशत्यधिक-द्विसहस्त्रतमवर्षे वार्षिक-फोरम इत्यस्मिन् भाषमाणः श्री अश्विनी-वैष्णवः उक्तवान् यत् येन प्रकारेण जीएसटी-संरचना कृता, तेन नित्यजीवनोपयोगिनः वस्तूनि कृषि-उत्पादनञ्च इतोऽपि मितव्ययी भविष्यति। रेलयात्रिणां सुरक्षाविषये सः अवदत् यत् भारतीय-रेलयान-परियोजनासु प्रति वर्षं त्रिंशत्-सहस्राधिक-एकलक्षकोटि- रुप्यतोऽप्यधिकानि रुप्यकाणि व्ययीक्रियन्ते। तेन प्रोक्तं यत् शासनस्य निरन्तरप्रयत्नैः दुर्घटनानां संख्या सप्तत्यधिक-एकशतं इत्यतः अपचीय गतवर्षे एकत्रिंशत् अभवत्।

भारत-अफ़ग़ानदेशौ

भारतेन पाकिस्तानस्थितानि आतंकवादिसङ्गठनानि विरुध्य वैश्विककार्याचरणाय संयुक्तराष्ट्रस्य आह्वानं कृतम्। भारतेन प्रोक्तं यत् संयुक्तराष्ट्रेण सूचीबद्धाः पाकिस्तानदेशे स्थिताः आतंकवादीसमूहाः आतङ्कवाद-प्रसारणार्थं अफगानभूमेः उपयोगं न कुर्युः। ह्यः संयुक्तराष्ट्र-सुरक्षापरिषदि अफगानस्थान-देशोऽपरि आयोजिते संक्षिप्त-वक्तव्ये भारतस्य स्थायी-राजदूतेन पर्वतनेनी-हरीशेन अफगानीस्थानदेशस्य आतंकवादसम्बद्ध-शोषण-निवारणाय समन्वितवैश्विक-कार्याचरणस्य आह्वानं कृतम्। सः अवदत् यत् भारतं तत्र सुरक्षा-स्थितिं कठोर-दृष्ट्या निरीक्षते। तेन अग्रे प्रोक्तं यत् भारतं अफगानीस्तानस्य सहायतायै सदैव अन्ताराष्ट्रीय-क्षेत्रीयसहकारस्य समर्थनं करोति।

बैड्मिंटन

बैड्मिण्टनक्रीडायाम् अद्य भारतस्य प्रमुखा क्रीडिका पी.वी. सिन्धुः चीन-देशस्य शेनझेन-नगरस्थे चाईना मास्टर्स् सुपर् पञ्चाशदधिक-सप्तशतं इत्याख्यायां प्रतियोगितायां महिला-एकल पक्षे स्वस्थानम् अवाप्तवती। सिन्धु: थायलैण्ड्- दलस्य पोंपवावी छोछूवोंग इतीमां एकविंशति:-पंचदश, एकविंशति: - पंचदश इत्यङ्कान्तरालेन पराजितवती।

।। इति वार्ता: ।।